मंगला नक्षत्रम्

शुकदेव 'मुनिः'

डॉ० रमाकान्त शुक्ल महाभागानां

करकमलेषु, आत्मविनयाभ्यां, समर्पण गौरवं इति चानुभवति.

स्नेहनम्रः

सुखदेवशर्मा

"मुनिः"

10-8-91

मंगलानक्षत्रम्

★

शुकदेव शर्मा 'मुनि'

वात्स्य प्रकाशन

नई बस्ती, सिनेमा रोड़, नाभा-१४७२०१

प्रकाशक :
वीरेन्द्र मोहन:,
वात्स्य प्रकाशन, नई बस्ती,
सिनेमा रोड़, नाभा-१४७२०१

प्रथमं संस्करणम्, १९९१

मूल्य :- ९५ रुपये

(सर्वे अधिकारा: लेखक अधीना:

भाषा विभाग पंजाब के सहयोग मे प्रकाशित

लेखक :
शुकदेव शर्मा 'मुनि'

MANGLANAKSHTRAM (Poetry)

By—Shuk Dev Sharma 'Muni'

मुद्रक :
जिन्दलसन प्रिंटर्ज़
मैहस गेट, नाभा।

विषय–वस्तु

१.	विनम्रा निवेदना	५
२.	मङ्गल मातनोतु	९
३.	हिता	१०
४.	मात: प्रपन्नार्ति हरे प्रसीद	११
५.	पाहि विश्वम्	१३
६.	हरते कुरुते	१५
७.	दिल्ली तु………	१७
८.	एषा	१९
९.	श्रमिका	२०
१०.	आसनी	२३
११	तीर्थम्	२५
१२	हरिणा:	२६
१३	तरङ्गिणां का प्रतिपतिरास्ते ?	२७
१४	नक्षत्रम्	२८
१५	कुठारी	३१
१६	कुठार:	३२
१७	लभते	३३
१८	स्वदन्ते	३४
१९	काल-विडम्बना	३५
२०	मातश्चण्डं कथं मन: ?	३८
२१	निम्ब-वृक्षा:	३९
२२	विस्वरास्ताल-योजना:	४०
२३	नवं यौवनम्	४१
२४	पणो हि	४२
२५	विनाग्निम्	४३
२६	ब्रूहि	४४
२७	मोदते	४५
२८	न रोचन्ते	४६
२९	शोभन्ते	४७
३०	भाग्यवदा	४८
३१.	मुनेस्तृषा	५०

३२.	किं जटा	५१
३३.	साम्प्रतंसाम्प्रतं किमु ?	५२
३४.	भ्रमन्ति	५३
३५.	पंजाब केसरी	५४
३६.	वीरः	५५
३७.	दूयन्ते	५६
३८.	न दूयन्ते	५७
३९.	विज्ञोऽपि शिथिलायते	५८
४०.	अर्थकामः श्रमं चरेत्	५९
४१.	केशाः श्वेता नचातपैः	६०
४२.	शोभते	६१
४३.	मूलम्	६२
४४.	सहायकः	६३
४५.	परीक्ष्यन्ते	६४
४६.	स्वर्णायते युगः	६५
४७.	मशक-पाद-विपादिकायाम्	६६
४८.	सर्वत्र सर्वे गुणाः	६७
४९.	सत्त्वे वसति	६८
५०.	न च सुवंशश्चदनं भवति	६९
५१.	सर्वारम्भाः	७०
५२.	न जीर्यंते	७२
५३.	ध्रुवं मरणाय कल्पते	७४
५४.	तद् राष्ट्रं सुखमेधते	७५
५५.	दिवं नयन्ति	७७
५६.	न दिवं नयन्ति	७८
५७.	स सुखेन शेते	७९
५८.	स सुखं न शेते	८०
५९.	ये-ते	८१
६०.	कमलं कठिनम्	८२
६१.	सा धरा	८३
६२.	यदा-तदा	८७
६३.	शुभाशंसा	८९

विनम्रा निवेदना

संस्कृतं संसारस्य सर्वासु भाषासु प्राचीनतमा भाषा। प्रायः अन्याः सर्वाः भाषाः अनया एव भाषया प्रेरणां मार्गं दर्शनं च प्राप्नुवन्ति। जगतां प्राचीनेभ्यः अपि प्राचीनाः ग्रन्थाः अत्र एव उपलब्धुं शक्यन्ते। वैदिक-कालाद् एव संस्कृतं विदुषां, पण्डितानां प्रकृतीनां च जन-भाषा अवर्तत। समये समये युगे युगे च इयं भाषा अनेकेषां उच्चकोटीनां नरपतीनां अपि आश्रयस्य आशीर्वादस्य च परमं सौभाग्यं अलभत। अनेके नरपतयः धनपतयः च स्वयं अपि स्व-वाणी-विलासेन अस्याः साहित्यस्य श्रीवृद्धिं समाचरन्। युग युगान्तरेभ्यः शिक्षिताः दीक्षिताःप्रजाः च एनां एव स्व-माध्यमरूपेण आत्मसात्करणे गौरवं आवहन्। संस्कृत-साहित्यस्य इयं धारा अद्यापि सततं प्रवहमाना आस्ते।

भारतानां ईश्वर-व्यक्त-अव्यक्त ज्ञ सम्बन्धिनः विचाराः संस्कृत-मयेषु वेदेषु उपनिषत्सु, पुराणेषु रामायण महाभारतादिषु च विस्तरेण निरूपिताः विलसन्ति। आर्याणां धर्मस्य इतिहासस्य च मूलं स्रोतः संस्कृतं एव। संस्कृत-भाषां प्रति भारतीय जनतायाः मानसे तथा महद् गौरवं यथा एनां भाषां मा देव-भाषा, अमर-भाषा, सुर-भारती आदिभिः श्लोक्यैः आदर-सूचकैः च नामभिः सम्बोधयति!

संस्कृतं भारतीय-भाषाणां बीजं वा मूलं व वर्तते। वाल्मीकि-व्यास-कालिदास-भवभूति-भारवि-माघ-बाण-दण्डि-सुबन्धु-अम्बिकादत्त-अश्वघोष-भासादयः अजराः अमरा अचलाः च कवयः निजाभिः अमृत-प्रवाह रूपाभिः कविता-कलाभिः अस्य साहित्यस्य भण्डारान् समपूरयन्। रामायण-महाभारतादीनि अमराणि महाकाव्यानि कस्य सहृदयस्य हृदयं न आवर्जयन्ति? सदा सरसानि एतानि सरसिजानि, येषां सुरभिः, सौन्दर्यं, सेवनं रूपं च प्रतियुगं जन-मानसानि समान्दोलयन्ति जन चेतनां च जनयन्ति।

स्वतन्त्रता प्राप्तेः अनन्तरं अपि लोक-मानसेषु एनां भाषां प्रति आकर्षणं प्राग् इव वर्तते। अद्यापि संस्कृत-साहित्य काराणां,अस्य प्राचीन अर्वाचीन-विद्यासु समानः एव समादरः। वेद भूमौ, साम्प्रतं उदासीने पंजाबे अपि संस्कृत साहित्य शिरोमणीनां संख्या काल-युगानुरूपा एव

विराजते। पंजाब-भाषा-विभाग: अस्य विकासे जागरूक: दृष्टि गोचरं समायाति।

अथ रूढिवाद: अस्तोन्मुख:। स्वतन्त्र भारते साहित्य-क्षेत्रे अपि उदारतया नूतनया परिपाट्या च स्थानं गृह्यते। प्रजा जनेन अपि अयं पन्था: सहर्ष सादरं च अनुमोद्यते। दुरूहा शैली शिथिल प्राया। नवा रुचिरा लोक भाषानुरूपा परिपाटी प्रजया प्रतिपद्यते। युग-प्रभाव: सामोदं सादरं च शिरसा धार्य:। प्रान्तीय भाषाणां तुलनायां संस्कृज्ञै: अपि भारती-संस्कृति-रक्षणाय सरला, सुगमा, अभिरूप - अभिमता च प्रणालो समाश्रणीया।

अस्मिन् सन्दर्भे मञ्जुला-नक्षत्रे राष्ट्रिय-विचार-मुक्ता ओत-प्रोतानि साधारणया तूलिकया गुणितानि कविता प्रसूनानि धीरधियां श्रीमतां पाणि-पल्लव-तल्लज-शरणं समाश्रयन्ते। एतानि किंरूपणि! किंफलानि? अयं तु अभिरूपाणां एव विषय:। नात्र रसाला स्वादा स्वादन-मुग्धेन शुकेन किमपि वचनीयम्। आम्, एतेन सारस्वत कर्मणा वर्तमाने प्रसङ्गे यदि स्वल्पं अपि, यस्यापि कस्यापि, उपकृतं अभविष्यत् तदा सफल: मे प्रयास:।

दिशा-शून्यो युवा वर्गो, राष्ट्र-धारा-समन्वित:।
यदि नागरिको जातो, जातो मे सफल: श्रम:॥

किञ्च :—

अभिधां परमां प्राहु:, अभिधेय प्रकाशने।
लक्षणामुत्तमां विज्ञा:, लक्ष्यार्थ-प्रतिपादने॥

व्यञ्जनां व्यंग्य-बोधे च, प्रशंसन्ति मनीषिण:।
रसात्मकं वच: काव्ये, श्लाघन्ते रसकोविदा:॥

शब्दार्थ-युगलं काव्ये, रस-भाव-समन्वितम्।
अदोषं गुणवत्सारं, एवं केऽपि मनीषिण:॥

रीतिरात्मा हि काव्यस्य, इति रीति-विदो विदु:।
काव्य-प्राणास्तु वक्रोक्ति:, उक्तवैचित्र्य मानिन:॥

स्वभावोक्तिं परां प्राहु:, हृदय-मर्म-वेदने।
आत्मानं ध्वनिं काव्ये, ध्वनिकार-महोदया:॥

विशुद्धिं च गिरां विज्ञा:, भिन्नां भिन्नां प्रचक्षते।
युगे देशे च काले च, वाणी सर्वत्र भिद्यते॥

सर्व-मनोरमा वाचः, दुर्लभा जगतीतले।
माननीयाश्च विद्वांसः, काल शब्द-विवेचिनः ।।
प्रातीतिक-विलासोऽयं, लसतां जन-मानसे ।
मिश्रितश्च श्रितो मार्गः, रूचिरः? सफलः श्रमः ।।
अनुभूता श्रुता दृष्टाः, मया चार्था निवेशिताः।
किंरूपाः ? किं फलाश्चैते, निर्णयो विदुषां करे ।।

मङ्गला नक्षत्रस्य प्रकाशने येषां महानुभावानां सहयोगः अमिलत ते सर्वे अपि मे दक्षिण हस्ताः धन्यवाद मर्हन्ति। विशेषतः पंजाब सर्वकारः, भाषा-विभागस्य अधिकारिणः च धन्यवादार्हाः, येषां कृपा-कटाक्षेण आंशिकः अनुदान-राशिः प्रापि।

इतः च, पंजाबी विश्व विद्यालये संस्कृत-विभागाध्यक्षाणां श्रीजुषां डॉ० रवीन्द्र कौर महानुभावानाम्, जम्मू-विश्व-विद्यालये संस्कृत-विभागं सभाजयतां डॉ० राम प्रताप वेदालङ्काराणां, अमृतसरे गुरु नानक विश्व-विद्यालये संस्कृत-विभागं भूषयतां डॉ० शुकदेव पादानाम्, पंजाबी-विश्व-विद्यालये संस्कृत विभागे वरिष्ठाचार्य पदभाजां मलिकोत्तराणां डॉ० अभिमन्यु मनीषिणाम्, साहित्य शिरोमणीनां भारत राष्ट्रपति द्वारा प्राप्त सम्मानानां मलेरकोटला सर्वकार-कालेजे संस्कृत-विभागाध्यक्षाणां प्रो० देव दत्त भट्टि महोदयानाम् दिल्लीस्थ आकाशवाणी संस्कृत-प्रवाचन विभागे योग्यं पदं सभाजयतां मम भ्रातृवर्याणां पं० विश्वनाथपादानां च मार्ग-दर्शनं उत्साह-वर्धनं च उभे अपि विधे अविस्मरणीये इति एतेषां मनोवाक् कायः "आभार" प्रकटने गौरवं आवहामि।

मुद्रणे च अस्याः रचनायाः जिन्दलसन प्रिंटर्ज, नाभा. मालिक महोदयस्य एम.आर. जिन्दलस्य मनसा वचसा कर्मणा च मिलितः सहयोगः चिरं स्मरणीयः इति श्रो जिन्दलः धन्यवाद पात्रम्।

यथार्थतः सफल-कलाऽऽकलन कुशलिनः शक्तिमतः साम्बस्य सदा शिवस्यैव धन्यवादः। रक्षिता मे कला येन, शिवायास्तु सदाशिवः।

शुकदेव शर्मा 'मुनिः'

समर्पणा

सन्तोषाऽमृत-तृप्तस्य, द्विजराजस्य धीमतः।
कर्म-निष्ठस्य तातस्य, स्मृतौ चैषा समर्पणा॥

श्रद्धा-पुष्पाणि तातस्य, पाणि-पद्मेषु यच्छतः।
आमोदः सुमहानस्ति, तेषां-तेभ्यः प्रयच्छतः॥

जाता सुखानुभूतिस्ते, तथा मे तोतली पदैः।
जायतां तात! साद्यापि, तादृशैरेव तादृशम्॥

तात! तव कराम्भोजे, सुमनांसि समर्पये।
साञ्जलि सादरं वन्दे, अर्पितं जगतां हिते॥

श्री गणेशाय नमः

मंगलमातनोतु

यस्या जुषा भक्त - जने विकासः,
यस्या रुषा दानव - वंश - नाशः ।
यस्या हृषा वाञ्छित - लाभ - हेतुः,
तस्या स्तृषा मङ्गलमातनोतु ॥

हिता

या मे भवानी भव-ताप-शम्बा,
जघान कोपारुणया दृशाम्बा ।
शुम्भं निशुम्भं महिषासुरं वा,
सा स्यात्सदैवं भवतां हिताम्बा ।।

या मे भवानी जन-ताप-वारम्,
धृत्वाऽवतारं बहुरूपकारम् ।
भक्तोपकारं विदधे सुधारम्,
सा स्यात्सदैवं भवतां हिताऽरम् ।।

यया भवान्या जगतां हितार्थे,
धृत्वाऽवतारं क्षपिताः क्षणार्धे ।।
सुन्दोपसुन्दापर - चण्ड - मुण्डा,
सा स्यात्सदैवं भवतां हिताण्डा ।।

या मेऽविकम्पा गिरिराज-कम्पा,
भक्तानुकम्पाऽसुर - जाति-शम्पा ।
सरःसुपम्पा पवने च झम्पा,
सा स्यात्सदैवं भवतां हिताऽम्पाः ।

या मे प्रियाम्बा गिरिराज कन्या,
सेवानुगम्या सुर-जाति-नम्या ।
धन्यातिधन्या सकलार्थ - वन्या,
सा स्यात्सदैवं भवतां हिताऽन्या ।

जुष्टा भवानी जननी मदिष्टिम्,
तनोति तुष्टिं वितनोति दिष्टिम्,
हृष्टिं च पुष्टिं सुतरामरिष्टिम्,
सा स्यात्सदैवं भवतां हिताऽष्टिः ।।

मातः प्रपन्नार्ति-हरे प्रसीद

देवि ! प्रणामाः शतशो नतानाम्,
उपेक्ष्य दोषान् गुणमातनोषि,
मानं प्रतिष्ठां मतिमासुनोषि,
मातः ! प्रपन्नार्ति-हरे प्रसीद ॥

देवि ! प्रणामाः शरणं गतानाम्,
धुनोषि पापं हितमाचिनोषि ।
शृणोषि वाचं यजनं सुनोषि,
मातः ! प्रपन्नार्ति-हरे प्रसीद ॥

देवि! प्रणामा स्तवभक्ति-भाजाम्,
हिन्दू जनानां किमु यावनानाम् ।
सुयोग-भाजां किमु भोग भाजाम्,
मातः ! प्रपन्नार्ति-हरे प्रसीद ॥

दानेश्वराणां किमु तस्कराणाम्,
सुखी -सुतीनां वनिता-पतीनाम् ।
कायेन वाचा मनसा-रतनाम्,
मातः ! प्रपन्नार्ति-हरे प्रसीद ॥

सच्छत्रझण्डं धृत - हस्तकानाम्,
जनोपमर्दे जयवाचकानाम् ।
शक्ति-कथायां दृढ-मानसानाम्,
मातः ! प्रपन्नार्ति-हरे-प्रसीद ॥

अर्चां च पूजां विधिना चरन्ति,
होमादि कृत्वा स्तुतिमाचरन्ति,
अर्चन्ति कन्यां वटुकं नमन्ति,
मात: ! प्रपन्नार्ति-हरे प्रसीद ।।

देवि ! प्रभावस्तवरामभद्र:,
जायां च लङ्कां दशकन्धरं च ।
भूयोऽपि लेभे जितवान् जघान,
मात: ! प्रपन्नार्ति-हरे प्रसीद ।।

देवि ! प्रसाद: पवनेन्द्र जातौ,
पारेप्रतिज्ञं कुशलं समेतौ,
खलाश्च जीर्णा भव-ताप-शान्ति:,
मात: ! प्रपन्नार्ति-हरे प्रसीद ।।

पाहि विश्वम्

मातः ! गतेभ्यो भवनं त्वदीयम्,
ददासि तुष्टिं क्षमतां च भक्तिम् ।
धनं च धान्यं विशदं विवेकम्,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ॥

मातः ! समेषां निज-सेवकानाम्,
तीरे तरङ्गैस्तरिणीं तनोषि ।
विधूय मान्द्यं धियमातनोषि,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ॥

मातः ! सुतानां शरणागतानाम्,
स्नेहेन तीर्थे शिरसा नतानाम् ।
करोषि रक्षां हितमासुनोषि,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ॥

घोषैस्तवोच्चैः शिखरे गतानाम्,
हासोपहासै र्मुद मागतानाम् ।
नृत्येऽपि गीतेऽपि भृशं रतानाम्,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ॥

त्वया कृतानां किमु कारितनाम्,
रक्षोवधानां श्रवणे रतानाम् ।
दुर्गादि - पाठे मनसा पराणाम्,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ॥

दण्डीय यात्राऽऽचरणे दृढानाम्,
तीरे सरस्या मुदितं गतानाम् ।
गतागते नैव विभावितानाम्;
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ॥

मातः ! बुधानां कविता-पराणाम्,
निशम्य वाचं प्रियमावृणोषि ।
तनोषि भव्यं गुणमादधासि,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ।।

हिंसन्ति लुठन्ति धनं हरन्ति,
आतङ्कवादं भृशमाचरन्ति ।
ये, तेषु, मातः ! करुणां कुरु त्वम्,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ।।

दहन्ति गेहान् वसमाःहरन्ति,
चिन्वन्ति दीनान् भृश मातुदन्ति ।
ये, तेषु, मातः ! तनुतां दयां त्वम्,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ।।

घृणां सृजन्तो न गुरोः स्मरन्ति,
रोधे विरोधं प्रसभं चरन्ति ।
कुर्वन्ति पापं, करुणां कुरु त्वम्,
प्रसीद विश्वेश्वरि ! पाहि विश्वम् ।।

हरते–कुरुते

द्वीपाना मुत्तमे द्वीपे,
जम्बु - द्वीपे सुभारते।
पञ्चनद मही - खण्डे,
पट्वालय — सुमण्ड़ले ।।

ग्रामाणां चोत्तमे ग्रामे,
मण्डने देश - मण्डने ।
विद्याना मुत्तमं स्थानम्,
तपो भूमि - रनुत्तमा ।।

सिद्धानां पावनं क्षेत्रम्,
कर्म क्षेत्रं च तद् विदाम्।
गवां च रुचिरं स्थानम्,
तपसां महतां फलम् ।।

यत्र

सुरसा विशदा सुगमा सरसी,
वट-जम्बु-कदम्ब-शमी-सहिता ।
शुक- सारस- केकि- रवै-रमणी,
कलुषं हरते स्पृशतः सहसा ।।

तत्र

मणिभिर्धवलैः खचितं भवनम्,
सघनास्तरवो हरिताः परितः।
सुरसा स्वरसा पिक-गीति रहो,
वद, कं न जनं मुदितं कुरुते ।।

अत्रैव

लघवो गुरवः कृषकाः श्रमिकाः,
जल-मध्य-गताश्च तरन्ति यदा।
वट-शाखि-गताश्च छलन्ति तदा,
भवनं समुपेत्य नमन्ति मुदा ।।
मुदिताः, कुहिता न भवन्ति जनाः,
वरमीप्सित मात्म-कृते वृणते।
छल-हीन-धिया कुरुते सवनम्,
यजते मनुजो भजते शरणम् ।।

दिल्ली तु

देशो माता भगिनी भ्राता,
देशस्तातो राम स्ताता:।
देशो जाति र्ज्ञाति र्बन्धु:,
देश: शर्व: करुणा सिन्धु:।
देशो मेघ: स्वाती बिन्दु:,
देशो धर्मो गौरव नन्दु:।
देशं जाने नान्यं जाने,
देशं, देशं भज भद्रमते।
भज योगेशं, भज योगेशं,
योगेशं भज, भज भद्रमते॥

देशो वित्तं देशो मित्रम्,
सर्वस्वं मे प्रियं कलत्रम्।
देशो रेवा तापी तुङ्गा,
देशो रावी यमुना गङ्गा।
देश: पद्मा भीमा धिषणा,
देश: शोणो गोदा कृष्णा,
देश: पूजा देश: सन्ध्या,
देशो विन्ध्या देश: किन्ध्या।
देशो लज्जा देशो हृज्जा,
देशो मज्जा देश: सज्जा।
देशो रामो देशो ह्यल्ला,
सतां गुरु: स: कुल्लमकुल्ला।
भज सीतेशं, भज सीतेशं,
सीतेशं भज, भज भद्रमते॥

देशो जम्मूश्चम्बा गोया,
देशो दिल्ली देश स्तोया।
देशो गीता भावो योग:,
देशो वीणा रागो भोग:।

देशो वेदा गौरव मानः,
पुरातनोऽयं नवोऽसमानः ।
देशो नव्यो भव्या रङ्गाः,
नवा नवा मे चित्त तरङ्गाः ।
भज योगेशं, भज योगेशं,
योगेशं भज, भज भद्रमते ।

देशस्तीर्थो भक्तिः शक्तिः,
देशः प्राणा वृत्तिस्तृप्तिः ।
देशः क्लृप्तिर्लृप्तिर्दृग्तिः,
देशो गुप्ति र्युक्ति र्मुक्तिः ।
धर्मा भिन्ना देशस्त्वेकः,
प्रान्ता भिन्ना देशस्त्वेकः ।
भाषा भिन्ना देशस्त्वेकः,
देशस्त्वेको देशस्त्वेकः ।
भज गौरीशं, भज गौरीशं,
गौरीशं भज, भज भद्रमते ।।

शाखा भिन्ना वृक्षस्त्वेकः,
हस्तो भिन्नो मुष्टिस्त्वेका ।
धारा भिन्ना सलिलंत्वेकम्,
कुम्भा भिन्ना गगनंत्वेकम् ।
देहा भिन्ना आत्मा त्वेकः,
मार्गा भिन्ना दिल्लीत्वेका ।
देशं जाने नान्यं जाने,
देशं, देशं भज भद्रमते ।
भज योगेशं, भज योगेशं,
योगेशं भज, भज भद्रमते ।।

एषा

एषा भारत विधवा, करुणा - मूर्तिरथवा ।
प्रदूषिताऽस्याश्छाया, काञ्चन यष्टी काया ।
प्रभोर्विचित्रा माया, प्रभोर्विचित्रा माया ।।

अस्या वेणी मुक्ता, मधुमय - वेला लुप्ता ।
पर्वोल्लासा लीना, सुरसा वाणी क्षीणा ।
प्रभोर्विचित्रा वीणा, प्रभोर्विचित्रा वीणा ।।

जोर्ण - शीर्ण - परिधाना, शुष्का रूक्षा धाना ।
अस्या वसुधा शय्या, संषा नो परिणय्या ।
प्रभोर्विचित्रा नय्या, प्रभोर्विचित्रा नय्या ।।

कर्तव्योऽस्य विरोधः, अयं पुराणो रोधः ।
चिरन्तनोऽयं रोगः, मानव - जाते र्भोगः ।
प्रभोर्विचित्रो योगः, प्रभोर्विचित्रो योगः ।

मानव-जातेः कुठारीयम्, यद्यपि पुराणी रीतिरियम् ।
नीतिर्नैषा लोक प्रिया, अस्याः कार्या शल्य-क्रिया ।
प्रभोर्विचित्रा कर्म-क्रिया, प्रभोर्विचित्रा कर्म-क्रिया ।।

श्रमिका

एषा भारत - भाला,
एषा श्रमिका बाला।
यस्याः श्रमिका माता,
यस्याः श्रमिका स्ताताः।
श्रमिके वंशे जाता,
एषा श्रमिका जाता।
एषा श्रमिका बाला,
एषा भारत भाला।

एषा श्रमिका बाला,
विंशति - वर्षा काला।
बाला पञ्चक - बाला,
पेट - निमित्तं लालाः।
उदरे रेखा - माला,
भाले बिन्दु - जालाः।
खचित-चलाचल -शाला,
विरचित-विशाल-शाला।
इयमधुनाऽपि वि-शाला,
न यस्याः कापि शाला।
अहो ! करालाः कालाः,
अहो करालाः कालाः॥

यस्या: केशा रूक्षा:,
कोमल - काया तक्षा।
रूक्षा अस्याश्चाक्षा:,
नयने ते न कटाक्षा:।
पक्ष्या जाता लिक्षा:,
भर्ता रूक्षो नयने रूक्षे।
माता रूक्षा ताता रूक्षा:,
नियतिश्चास्या रूक्षा।
अस्या: कार्या रक्षा,
अस्या: कार्या रक्षा।

स्तनयोस्स्तन्यं नास्या:,
गात्रे रक्तं नास्या:।
कुक्षी रिक्ता नास्या:,
मुष्टी रिक्ता चास्या:,
उचितोपेक्षा नास्या:।
कार्या रक्षा चास्या:।
अस्ति ह्येषा माता,
कष्टं सोढुं जाता।
अस्या: कुक्षे जाता:,
भारत मातुर्मस्ता:।
भारत मातुर्वस्ता:,
भारत मातुर्हस्ता:।

श्यामा जाता दीना,
शिशवो यस्या हीना:।
स्नाने फेनिल - हीना,
पूतिक - गन्धाऽपीना।
दिवसं साध्ये लीना,
नक्तं बालक - कीना।
एषा क्षमता हीना,
जाता ममताधीना,

एषा श्रमिका वत्सा,
जीवन नाथा ऽदासा ।
लोके घोरा हासा:,
एष भारत - वासा ।
गौरव - भाषा - भासा,
कार्या अस्यै वासा: ।
अस्या: कार्या मासा:,
अत्र न लज्जाऽऽभासा: ।
एषा भारत - भाला,
एषा श्रमिका बाला ॥

आसनी

प्रजानुग्रह - सम्प्राप्ता,
प्रजा वित्तापहारिणी ।
द्विपदेष्टा चतुष्पादा,
लोक - लोचन - हारिणी ।।
आसानी यत्र, तत्रास्ति,
माधवो जगतां पतिः ।
साचैषोमा - रमा - वाणी,
कल्याणी जगतां गतिः ।।
भजते यो जनस्तां सः,
लभते वाञ्छितं फलम् ।
शरणं याति यः प्राणी,
याति नो यम-यातनाम् ।।
सा ह्येषा निश्चला यत्र,
आसते तत्र सम्पदः ।
मोदते मानसं तत्र,
नासते तत्र चापदः ।।
चेतश्चेतनता मेति,
शास्त्रे च क्रमते मतिः ।
राजवल्लभता मेति,
शासने जायते रतिः ।।
विना तां न प्रवर्तन्ते,
यज्ञा वा भूरि दक्षिणाः ।
वासोऽपि दुर्लभस्तत्र,
अन्न-पानस्य का कथा ।।

स्वर्णमया गुणा: सर्वे,
पण्डित: स नरोत्तम: ।
कर-गाथा विलीयन्ते,
कार - यात्रा करेङ्गिता ॥
आसानी गन्ध माघ्राय,
स्वदते मोदते जन: ।
अर्था: कामा: समे तत्र,
सर्व - तीर्थ - समागम: ।
पापं स्तेयं च कृत्वाऽपि,
पुण्यात्माऽसौ शुचिर्नर: ।
पाप-गाथास्तु लीयन्ते,
तत्रैवानन्द - कौतुके ॥
यद् यद् वाञ्छति चित्तेन,
सर्वं प्राप्नोति मानव: ।
ह्वारिणी सर्व-पापानाम्,
पूर्वं - पुण्यै रवाप्यते ॥

तीर्थम्

तमोऽऽपहत्याऽतनुते प्रकाशम्,
शमं विधत्ते च रुषं निहन्ति ।
चिनोति धर्मं च कृणोति पापम्,
तीर्थं न किं किं कुरुते नराणाम् ।
नम्रं विधत्ते विदधाति पात्रम्,
कामं च धर्मं चिनुतेऽर्थ-मोक्षम् ।
कीर्तिं च लोके तनुते विशालाम्,
तीर्थं न किं किं कुरुते नराणाम् ॥
ग्रामे च गेहे नगरे च राज्ये,
देशे विदेशे किमुतान्य राष्ट्रे ।
वंश -प्रतिष्ठां वितनोति बन्धून्,
तीर्थं न किं किं कुरुते जनानाम् ॥
मानं सुमानं ममतामुदाराम्,
नानाविधं वाहन-सौख्य-जातम् ।
पत्नीं च पद्मां पदवीं पवित्राम्,
तीर्थं न किं किं कुरुते प्रजानाम् ॥

हरिणाः

येषां न भाषा न च वेष-भूषा,
स्वाचार-रीतिर्नच धर्म-भीतिः ।
ते वा नरा गर्दभ-भार-भाजः,
नराकृतौ ते हरिणा भ्रमन्ति ।।
ये बाल भावे न पठन्ति विद्याम्,
ये यौवने नार्थकरा भवन्ति ।
कदाचरन्तश्च तुदन्ति लोकान्,
नराकृतौ ते हरिणा भ्रमन्ति ।।
गीतां कुरानं जपुजीं जपन्ति,
हिंसां च पापं दुरितं वदन्ति ।
बीजं घृणाया भृशमावपन्ति,
नराकृतौ ते हरिणा भ्रमन्ति ।।
येषां न वीक्षा न च धर्म-दीक्षा,
पूजा परीक्षा न च योग-शिक्षा ।
न चास्ति मानोनिज संस्कृते र्वा,
नराकृतौ ते हरिणा भ्रमन्ति ।।
सन्ध्या नमाजैररदास-रूपैः,
पूजा-प्रकाराः कथिताः कवीन्द्रैः ।
येषां विचारा विपरीत-धाराः,
नराकृतौ ते हरिणा भ्रमन्ति ।।
गीता कुरानं जपुजी न भिन्नाः,
स्वार्थस्तु भिन्नः परमार्थतस्तु ।
ये स्वार्थमूलाः कलहं रभन्ते,
नराकृतौ ते हरिणा भ्रमन्ति ।।

तरंगिणां का प्रतिपत्तिरास्ते

फलैर्नता ये वितरन्ति छायाम्,
खगाश्च नीडेषु वसन्ति येषाम् ।
उत्पाट्य तांस्ता: सरिता: प्रयान्ति,
तरङ्गिणां का प्रतिपत्तिरास्ते ।।
शीतो हिमांशु: सुखदो वसन्त:,
वियोग-भाजां तपन: कृतान्त: ।
काव्ये कवीन्द्रै: कथित: किमेवम्,
तरङ्गिणां का प्रतिपत्तिरास्ते ।।
हा हन्त ! गाते वृषभानुजेयम्,
रन्तुं विहर्तुं वृषभानुजेन ।
धर्मो न भ्राता भगिनोमुपेयात्,
तरङ्गिणां का प्रतिपत्तिरास्ते ।।
धर्म: सुरेन्द्रो वरुणोऽनलश्च,
भार्या विदग्धा: परिहाय स्वर्गे ।
भैमीं वरीतुं वसुधां तु याता:,
तरङ्गिणां का प्रतिपत्तिरास्ते ।
धर्म: समीरो मघवा ससूर्या:,
गता: सुरूपा: परिहाय भार्या: ।
कुन्तीं कुमारोमविचार - कार्या:,
तरङ्गिणां का प्रतिपत्तिरास्ते ।।
पिता पयोधि: पतिरात्मनाभ:,
पुत्र: प्रजानां परिपालकश्च ।
प्रयाति पद्मा पलटेव पुंस:,
तरङ्गिणां का प्रतिपत्तिरास्ते ।।
मुखे पयोजे नयने पयोजे,
कला-कलायां कमलावतार: ।
हा हन्त ! मुग्धास्तृणुते पटेन,
तरङ्गिणां का प्रतिपत्तिरास्ते ।।

नक्षत्रम्

नक्षत्रं यस्य सम्पन्नम्,
प्रसन्ना स्तस्य देवता: ।
ग्रहा यक्षाश्च गन्धर्वा:,
दिशा - शूला वशंवदा: ॥
नक्षत्रे भासते योनि:,
गणो वर्गश्च पञ्चकम् ।
गण्डमूलं च संक्रान्ति:,
वर्णो वश्यश्च मित्रता ॥
ज्ञायन्ते च नवा योगा:,
नक्षत्रेण नवोद्यमा: ।
बैंकाध्यक्ष - प्रसादोऽपि,
नक्षत्रेणैव जायते ॥
नवा भूमिर्नवा वासा:,
शिल्प - साधन - योजना ।
नक्षत्रैणैव सिध्यन्ति,
नक्षत्रं परमा गति: ॥
समये सञ्चितं द्रव्यम्,
आपत्काले सुखावहम् ।
राष्ट्रीया - योजना सर्वा:,
नक्षत्रे परमाश्रिता: ॥
पक्षिणामपि विश्वास:,
नक्षत्रे दृढमास्थित: ।
जीवनं नाम संघर्ष:
स्वप्नश्चाथ मनोहर: ॥
स्वप्नेचाथ संघर्षे,
नक्षत्रं परमः सखा ॥
न नक्षत्रं विना योनि:,
गणो वर्गस्तथा ग्रहा: ॥

समये सञ्चितो राशिः,
कार्य - काले पितामहः ।
माता पिता तथा भ्राता,
अन्ये मित्राणि बान्धवाः ॥
नक्षत्रं दृष्ट्वा मुञ्चन्ति,
वचनं मर्म वेदिनः ।
न नक्षत्रेण विना वाचः,
सफला गुरु - गौरवाः ।
नक्षत्रं च बलं दीने,
सबले बल - वर्धकम् ।
राष्ट्र-सेवा च सम्मानः,
नक्षत्रं महतां धनम् ॥
कीटानामपि नक्षत्रे,
विश्वासो दृष्टि-गोचरः ।
जलदागमनात्पूर्वम्,
सञ्चन्तः: संचरन्ति ते ॥
एवं च किल गायन्ति,
शिवं सत्यं च सुन्दरम् ।
अस्माकमपि कर्त्तव्यम्,
नक्षत्रे राशि-योजनम् ॥
मित्रं मित्रं मित्रं मित्रम्,
तातो बन्धु हितं कलत्रम् ।
भज योगेशं भज योगेशम्,
योगेशं भज, भज योगमते ॥
भूमिस्तोयं घासो वासः,
स्वर्णं ताम्रं चषको लासः ।
हीरा मुक्ता भासो हासाः,
अन्नं धान्यं मासा रासाः ॥
ट्रैक्टर ट्राली हाली पाली,
अन्याः सर्वाः सुविधाः शाली ॥
स्कूटर मोटर-हीटर खाली,
टी.वी. मीटर थ्रैसर-पाली ।

बैंक - मनेजर करुणा शाली,
बैंक मनेजर करुणा शाली ॥

नक्षत्रम्

भव्या भव्या नवा योजना,
मार्ग-योजना कृषी योजना ।
मेला खेला भ्रमण योजना,
स्वास्थ्य-योजना प्रीति-भोजना: ।
विकास-योजना भ्रातृ योजना,
बैंक मनेजर करुण योजना: ॥

नक्षत्रम्

सैलर - बेल्लर - कूलर-योगा:,
पम्पर-बम्पर-जम्पर-योगा. ।
कुक्कुट-मत्सी- मक्षी - योगा:,
नव्या नवा योजना योगा:,
केन्द्रे क्षेत्रे विविधा-योगा:,
प्रान्ते राज्ये बहवो योगा: ।

परम्,

नगरे नगरे ग्रामे ग्रामे,
मनुजे मनुजे हा हा योगा: ।
संचयो नास्ति, नो नक्षत्रम्,
मूलं नास्ति, नो नक्षत्रम् ।
बैंक मनेजर करुणा क्षत्रम्
बैंक मनेजर करुणा क्षत्रम् ।

नक्षत्रम्

भज योगेशं भज योगेशम्,
योगेशं भज, भज योगमते ॥

कुठारी

भूषा यतीनां पिशुनी पतीनाम्,
निर्लज्जता चाथ कुलाङ्गनानाम् ।
वेश्या सतीनां कुमतिः प्रजानाम्,
मूलावघाता कठिना कुठारी ।।

ईतिः प्रजानां जडता कवीनाम्,
गीतिर्मृगानां खलता नृपाणाम् ।
पीतिर्गुरूणां शठता सुतानाम्,
मूलावघाता कठिना कुठारी ।।

दानेषु नेहा पठनेषु केहा,
दारेषु जेहा तरुणेषु मेहा ।
छात्रेषु छेहा विधुरेषु रेहा,
मूलावघाता कठिना कुठारो ।।

कुठार:

लोभ: सुखानां व्यसनं धनानाम्,
छलं सुराणां शकुनि: कुरूणाम्।
चरित्र हीनश्च सुत: कुलानाम्,
मूलावघात: कठिन: कुठार:।।
पाकस्य भुट्टो: शिविरस्य नैट्टो:,
हिन्देशियाया: कुपति: सुकर्णो: ।
चीनस्य चायुर्गदितो मुनीन्द्रै:,
मूलावघात: कठिन: कुठार: ।।
तोर्थेषु काक: स्थविरा - कुयोग:,
काके 'प्रयोग': विधुराभियोग: ।
वंशे च घात: कुल-हीन - योग:,
मूलावघात: कठिन: कुठार: ।।

लभते

मान्द्यं निरस्याऽतनुते विकासम्,
शान्तिं समाधाय निहन्ति कोपम्।
आधृत्य धर्मं च कृणोति पापम्,
ज्ञानेन किं किं लभते प्रजा न ॥

विनीतता थो विदधाति पात्रम्,
तेनार्थ - कामौ लभते च मोक्षम्।
अवाप्य कीर्तिं भजते प्रतिष्ठाम्,
ज्ञानेन किं किं लभते जनो न ॥

आधिं प्रभूतां विनिहन्ति सद्यः,
व्याधेर्निवृत्तिं कुरुते च सद्यः।
ग्रहादि जन्यान् विनिहन्ति दोषान्,
ज्ञानेन लोको लभते न किं किम् ॥

स्वदन्ते

देशे विदेशे किमुतान्य - देशे,
धीराः प्रसन्नाः कुशलं रमन्ते।
पितामहान्धुरिति घोषयन्ते,
क्षारं जलं का पुरुषाः स्वदन्ते ।।

ग्रामे सुखं नो नगरेऽसुखं न,
विज्ञस्य यात्रा न तु मन्द बुद्धेः।
पितामहादागत एष कूपः,
क्षारं पयः कापुरुषाः स्वदन्ते ।।

हरेर्मुरारेरथवा पुरारेः,
रम्ये विचारे रमते रमेशः।
पितामहाना मय मस्ति कूपः,
अपोऽपवित्राः कुनराः स्वदन्ते ।।

नरोऽप्रतिहत - प्रतिभाः,
यत्रापि कुत्रापि सुखं रमन्ते।
उष्णं क्षारं च वारि,
वीराः पुरुषाः स्वदन्ते नो ।।

काल-विडम्बना

पञ्चेशो हन्यते यत्र,
उग्रवादेन निर्दयम् ।
अन्ये ततः पलायन्ते,
हा ! हा ! काल-विडम्बना ॥

आचार्य - गुरु-सम्बन्धः,
मधुरो हित - कारकः ।
ऐतिह्य - पुस्तिका - गाथा,
हा ! हा ! काल-विडम्बना ॥

गुरवश्छात्रान् लुण्ठन्ति,
गुरोश्छात्रावहेलना ।
छात्राश्चाथ प्रतार्यन्ते,
घोरा काल - विडम्बना ॥

वेदानामुद्भवो यत्र,
गुरूणां च मनीषिणाम् ।
उपसर्गाः प्रतायन्ते,
नूनं काल - विडम्बना ॥

पंजाबे संस्कृतेर्यत्रऽ,
ऽभासते पूर्णिमा सदा ।
कुहूरातङ्क - वादस्य,
अहो! काल - विडम्बना ॥

मालिन्या सह सम्पर्कः,
वायस्या सह सङ्गमः।
शृगाल्या सह संवासः,
कलि - काल - विडम्बना ॥

वार्धक्ये जीर्यते पत्नी,
धनं बान्धव - हस्तयोः।
वृत्तिश्चाथ पराधीना,
हन्त ! काल - विडम्बना ॥

कुल-भार्या स्तु ताड्यन्ते,
जङ्गमीनां समागमे।
यवन्यां रमते रामः,
घोरा काल - विडम्बना ॥

निम्नाः शिखरमारूढाः,
शिखिनो गर्त - भागिनः।
रक्ते च श्वेतिमा जातः,
अहो ! काल - विडम्बना ॥

गङ्गा तु दूषिता जाता,
वेश्या जाता तपस्विनी।
वर्णाश्च सङ्कराः प्रायः,
घोरा काल - विडम्बना ॥

गावोऽमेध्ये च रम्भन्ते,
श्वा तल्पे सुखमेधते।
न गोष्ठिः शूकरी चोष्ठिः,
नूनं काल - विडम्बना ॥

पूजा स्थाने दरी - वासः,
तत्र नृत्यं सुराङ्गनाः,
गतावाणी, वनी राज्यम्,
तीव्रा काल - विडम्बना ॥

पूजा - स्थानानि हेल्यन्ते,
धर्म - ग्रन्थावहेलना ।
स्वीयैः स्वीयाश्च घात्यन्ते,
घोरा काल - विडम्बना ॥

गंगा गीता च गायत्री,
गौश्च गो-वंश - पालकाः ।
गौरी गुरुश्च गोविन्दः,
क्व ! हा ! काल - विडम्बना ॥

रामः कृष्णश्च गोविन्दः,
गुरु स्तेगबहादुरः ।
नानकश्च दयानन्दः,
वयं ? काल - विडम्बना ।

रात्रौ रामाभिषेकस्य,
हर्षोल्लासा जने जने ।
प्रातः जाता वनादेशाः,
नूनं काल - विडम्बना ॥

मातश्चण्डं कथं मन:

कमले कमलावासे,
करुणे करुणालये ।
बहु जातं; कृपां कांक्षे,
चिरं जातं, कृपां कुरु ।
जननी धीर - वीराणाम्,
धार्मिकाणां सहोदरा ।
धातुर्माता प्रिया विष्णो:,
माता सर्वस्य माधवी ।
शैलाधिराज पुत्री त्वम्,
प्रजा चासि प्रजापते: ।
दयिता च दयासिन्धो:,
मातश्चण्डं कथं मन: ॥

जननी शरणं भरणम्,
जन्तोर्विपदां विदारणं वरणम् ।
तापैर्नितरां तप्ते,
कथं दयालु नान्त: करणम् ॥

निम्ब वृक्षाः

तातेति तातेति चिरं प्रबोधि,
न चास्य चित्तं ममतामबोधि।

नायं सुधारे मतिमातनोति,
सदैव वाटं कुटिलं प्रयाति ॥

किमत्र चित्री यदि वा भवित्री;
महा जनानां वचनी न पत्री।

सिञ्चेत्सुधीरो मधुरैश्च तोयैः,
न निम्ब वृक्षा मधुरा भवन्ति ॥

वि-स्वरा ताल-योजना

कोऽपि बन्धुर्दिवं यातः
तत्र नृत्यं सुराङ्गनाः ।

अथो ह्रासोपहासाश्च,
हर्षे हाहेति योजनाः ॥

अधमः सेवते वेश्याम्,
वेश्या गामी सतीं प्रियाम् ।

वीत फलं खगो वृक्षम्,
भग्न - राज्यं नृपं प्रजा ॥

वृत्ति - हीनो विवाहेच्छाम्,
वित्त - हीनश्च मारुतिम् ।

वृत्तोनो भाषते शास्त्रे,
विस्वरास्ताल - योजनाः ॥

नवं यौवनम्

वर्षा नदीनां ऋतुराट् तरूणाम्,
अर्थो नराणां पतिरङ्गनानाम् ।
न्याय-प्रधानश्च नृपः प्रजानाम्,
नव्यं नवं यौवनमावहन्ति ॥

नवा तुरङ्गी रमणी सुकोमला,
मानः सभायां प्रतिभा विचित्रा ।
सुधीः कुमारो विजयो विवादे,
चिरं नवं यौवनमावहन्ति ।

प्रभात - काले भ्रमणं नरस्य,
भव्यं च गव्यं महिषी-पयश्च ।
मनोऽनुकूला सबलाः सहायाः,
नूनं नवं यौवनमावहन्ति ॥

पौत्रस्य लाभः कवि कालिदासः,
विद्या - विकास· शरदागमश्च ।
स्वच्छे समीरे सुरभौ च वासः,
क्षणे नवं यौवनमावहन्ति ॥

कृपस्य वर्षा फलता श्रमस्य,
सूदागमश्चैव महाजनस्य ।
पुत्रस्य वाप्तिः प्रमदा - जनस्य,
नवं नवं यौवनमावहन्ति ॥

इष्टेश्च सिद्धि द्रविणौघ - वर्षाः,
लाभः सभायां 'तमगा' प्रकर्षाः ।
गुरोः कृपालोः परमाः प्रकर्षाः,
भव्यं नवं यौवनमावहन्ति ॥

पणो हि

पण - हीनं नरं दारा:,
भृत्या मित्राणि बान्धवा: ।
विहाय दूरतो यान्ति,
पणो हि परमेश्वर: ॥

पणिनं मानवं लोक:,
दूरादागत्य सेवते ।
विविध बन्धुतां गाते,
पणो हि परमेश्वर: ॥

पणो धर्म: पणस्तीर्थ:,
पण: पुत्र: पण: प्रिया ।
मोदन्तेऽपणिना नंते,
पणो हि परमेश्वर: ॥

तुलसी च पण: पाणी,
सुधा वाणी पणो गुरु: ।
पणज्ञा: साधु सेवन्ते,
पणो हि परमेश्वर: ॥

विनाग्निम्

दरिद्रता नीच जने च सेवा,
ऋणावशेषा: श्व-जनावहेला ।
प्रिया वियोगा विषमाश्च वामा:,
विनाग्निमेते च दहन्ति कामा: ।।

मूर्खा महीपा: कुटिला: कुदारा:,
वित्तेन हीना वणिजां कुमारा: ।
शास्त्रैश्च हीना द्विज राज-दारा:,
विनाग्निमेते च दहन्ति कारा: ।।

काणा: कुमारा विधुरा कुमारी,
मूर्खैश्च कारा: कुल-हीन-पारी ।
विदेश-जाता पण-नीत नारी,
विनाग्निमेते च दहन्ति मारी ।।

ब्रूहि

शची मिच्छति नौ वत्स:,
ब्रूहि किं करवावहै ॥
शर्करां चीनिकां यच्छ,
शचीमर्थं समर्थय ॥

शर्करा - चीनिका - कल्प:,
शची - प्राप्तिस्तु दुर्लभा ।
अभिलाषो महानस्ति,
शक्र - तुल्यश्च नौ सुत: ॥

आद्येन वर्णेन विना शुकोऽहम्,
किकश्च मध्येन तथान्तिमेन ।
किंशु: सुरूपो विपिने वसामि,
कृष्णो गले वा लपने च शोण: ॥

पद्भ्यां विहीनोऽपि सदा चलामि,
बाहु-विहीनोऽपि सदा वहामि ।
पादौ न मे स्तो न च पृष्ठ मास्ते,
स्पर्शो न मे रूप-गुणैरूपेत: ॥

आद्यो वर्णो लुप्यते चेन्नलोऽहम्,
मध्यो वर्णो लुप्यते चेदलोऽहम् ।
अन्त्यो वर्णो लुप्यते चेदनोऽहम्,
उष्ण: स्पर्श: सूर्य लोके चवास: ॥

पूर्वेण वर्णेन विना रणो स्याम्,
धनी तु मध्येन तथान्तिमेन ।
धरो भवामि प्रवदन्तु ताता:,
गन्ध-प्रधाना धरणो जनानाम् ॥

मोदते

राधया सहित: कृष्ण:,
रोहिण्या सहित: शशी ।
सीतया सहितो राम:,
सानन्दं मोदतेतराम् ॥
गोपमध्य - गत: श्याम:,
भ्रातृ-मध्ये च राघव: ।
श्यामं रामं च सम्प्राप्य,
सानन्द मोदते जन: ॥
गोपी - मध्य - गता राधा,
तारा - मध्ये - यथा विभा ।
गोपा कृष्णेन सङ्गत्य,
सानन्दं मोदते व्रज: ॥
गुरुभि: संगताश्छात्रा:,
छात्रैश्च संगतो गुरु: ।
शाला गुरुभिश्छात्रैश्च,
सानन्दं मोदते तराम् ॥
तृणाय मन्यते स्वर्गम्,
तृणं चापि च जीवितम् ।
तृणां नारीं विवेकेन,
सानन्दं मोदते बुध: ॥
सखी-मध्य-गता वीणा,
वीणेव रणणेतराम् ।
वीणां प्राप्य सखी-वर्ग:,
सानन्दं मोदतेतराम् ॥

न रोचन्ते

याचक - बोधक - चन्द्रा:,
कृपणाऽज्ञ चोरेभ्यो न रोचन्ते ।
सती रविरथवा केशा:,
कुलटा कुमुद-नापितेभ्यश्च ॥
अश्वा गजाश्च मेषा:,
महिष-सिंह-कपिभ्यो न रोचन्ते ।
नकुला मृगाश्च मूषा:,
च सर्प श्वान - विडालेभ्य: ॥

पिता पुत्र - विरोधा:,
विपरीत-परिणतयो न रोचन्ते ।
व्यतिरेके दुर्भाग्यात्,
पितु रपमानोऽपमरणं वा ॥
आप्तै नृपैश्च विप्रै:,
कुपरिणामाविरोधा: न रोचन्ते ।
प्रथम - विरोधे मरणम्,
अपर विरोधे क्षयश्च कुल-नाश: ॥

शोभन्ते

व्यवहरणे व्यवसायः,
दिव्या महिला च सारसे सदने ।
सम-गुण शीले स्नेहः,
राजनि चर्या च शोभन्ते ॥

छात्रो गुरुश्च राजा,
स्व स्वाध्याये च लोक संग्रहणे ।
सकला गणा गणेशाः,
च, निज निज कर्मणि शोभन्ते ॥

कविता वनिता धनिताः,
सुकमनीय-पदावली-धन-जनिताः ।
दाराः सुताश्च विभवाः,
सुकृत-परिणामाः शोभन्ते ॥

वामाचारा गुरवः,
पर-धन-निन्दा-जङ्गम-रति-विषयाः ।
मत्सर - सरसी - काकाः,
नारद-कृतयो न शोभन्ते ॥

उरसि सुतुलसी - मालाः,
पीत - धौतिकास्तिलकीकृत -भालाः ।
वैष्णवाश्च धन - राजाः,
वाचा भिन्ना न शोभन्ते ॥

भाग्यवदा

उदर-निमित्तं बहुविध-वेश:,
तदपि न मिलते भिक्षा लेश: ।
चल प्रति नगरं, चल प्रति सदनम्,
चल प्रति मनुजं, सुचल भाग्यवदे ।।
कृशतरकायो लगुडी हस्त:,
जीर्ण शीर्ण पटकाधृत-मस्त: ।
गोलक-बालक-भिक्षा - पात्र:,
तलुनी तरुणी-कृत-सहयात्र: ।
क्षुधा तृषातुर दारक हस्त:,
शुष्क: कण्ठो रिक्तोहस्त:,
चल प्रति नगरं, चल प्रति सदनम्,
चल प्रति मनुजं, सुचल भाग्यवदे ।।
लोकं प्रति प्रसारित-पाणि:,
तदपि समाजे नास्ति ग्लानि: ।
दर्शं दर्शं महिलावस्था:,
देशे जातेर्गोदृगवस्था: ।
महिला-कर्षा बालक-कर्षा:,
गौरव-मस्ता भारत - वर्षा: ।
चल प्रति नगरं, चल प्रति सदनम्,
चल प्रति मनुजं, सुचल भाग्यवदे ।।
चत्वारिंशदतीता वर्षा:
पुनरधि देशे गीता ह्येषा ।
उन्नत मस्ता भारतदेशा:,
एषा सीता राधा चैषा ।
करुणा शीला आर्यावर्ता:,
हा ! क्व गता स्ते विविधास्तर्का: ।
चल प्रति नगरं, चल प्रति सदनम्,
चल प्रति मनुजं, सुचल भाग्यवदे ।।

क्रान्तिः पूजा क्रान्तिः सन्ध्या,
जाता सैषा त्वधुना वन्ध्या।
बाले क्रान्ति वृद्धे क्रान्तिः,
हरिता क्रान्तिः शान्तिः शान्तिः।
मिथ्या घोषा मिथ्या हर्षाः,
उच्चा घोषा भारत-वर्षाः।
भज गौरीशं, भज गौरीशम्,
गौरीशं भज, भज भद्रमते।
मंत्रे तंत्रे यंत्रे चाथो,
राज्ये प्रान्ते केन्द्रे वाथो।
पक्षाघाताः कृपणाचाराः,
राज्ये चर्चा राम विचारा ।
क्वास्ते सीता क्वास्ते रामः,
क्वास्ते राधा क्वास्ते श्यामः।
क्वास्तेऽयोध्या मथुरा वृन्दा,
अयं सर्वोऽपि धिप्सा-धुन्दा।
गोरख धुन्दा, गौरव धुन्दा,
सूर्या कुण्डा रावी कुण्डा ।।
चल प्रति नगरं, चल प्रति सदनम्,
चल प्रति मनुजं, सुचल भाग्यवदे।।

मुनेस्तृषा

मातुस्तृषाऽपत्य-सुमङ्गलाभा:,
स्वसुस्तृषा सोदर-मान-भावा: ।
नेतुस्तृषा राष्ट्र-सुखे विभागा:,
दातुस्तृषा याचक-काम-भाषा: ।।

गुरोस्तृषा शिष्य-विकास- लाभ:,
साधोस्तृषा मोक्ष-विमोक्ष-लाभ: ।
हंसे तृषाथो पयसां विभाग:,
विज्ञे तृषा नूतन-योग-लाभ: ।।

मेघे तृषा चातक-वारि-दानम्,
गोपे तृषा गोकुल-पालनं वा ।
वैद्ये तृषा रोगि रुजो निवृत्ति:,
कृषे तृषा क्षेत्र-विकास वृत्ति: ।।

रवेस्तृषा लोक-तमो विनाश:,
हरे स्तृषा भक्त-हितेक्षणं च ।
कवे स्तृषा काव्य-विपाक-पाक:,
मुनेस्तृषा-मोक्ष-पदार्थ-लाभ: ।।

किं जटा

मानसं तु दया - सिक्तं,
सर्वदा सर्वं - प्राणिषु ।
शान्तिमेति गृहस्थो ना,
किं जटा - भस्म - लेपनैः ।।

यस्य चित्तं महाक्रूरं,
विषयै दूंषितं भृशम् ।
तस्य वेदैश्च शास्त्रैश्च,
किं जटा - भस्म - लेपनैः ।।

कौमारे चार्जिता विद्या,
यौवने चार्जितं धनम् ।
वानप्रस्थे तपस्तप्तम्,
किं जटा भस्म - लेपनैः ।।

यस्य चित्त - विकारो न,
भौतिक वादो न बाधको योगे ।
नियताहार - विहारः,
किं जटा भस्मादि लेपनैः ।।

बाल्ये सरलः साधुः,
न यौवने पतयालुः ।
पुण्यापुण्य - विरामैः,
किं जटिकैः परिणामैः ।।

साम्प्रतं साम्प्रतं किमु ?

रतिनाथस्य सेवार्थं,
रेवा-कुञ्जो मनोहरः ।
एला-परिमलो वायुः,
नूतनो जलदागमः ।।

चित्तमालि पराधीनम्,
उत्कण्ठा कलिकाऽऽकुलम् ।
कर्तुं मृगयते किञ्चित्,
साम्प्रतं साम्प्रतं किमु ?

भ्रमन्ति

राजन् हर्म्य - परिभ्रष्टा:,
त्वद् - वैरि - वनिता - वने ।
इतस्तत: पलायन्ते,
उग्रदाव - प्रभाविता: ॥

व्याकुला स्तव शत्रूणाम्,
भार्या भर्तृ - कराश्रया: ।
भ्रमन्ति परितो दावम्,
पाणि - पीडित - किंशुका: ।

पंजाब केसरी

विद्या-लक्ष्मी-वाच:,
चिन्तन-शक्ति: परोपकारार्था: ।
देश-सर्मपित-काय:,
स पंजाब - केसरी राय: ।।

सिंह: कोमल - चित्त:,
घन इव दाता वितरित-निज वित्त: ।
अंगद - पादास्तर्ता:,
पातित रिपु-हिते हिम कर्ता: ।।

वाचोऽपर हृत - चिन्ता:,
वित्तागमाश्च जनोपकारार्थे ।
शीलं सागर-तुल्यम्,
यशो धवलित-सागर-तुल्यम् ।।

दाने च लक्ष्मी: सुकृते च विद्या,
चिन्ताऽपरेषां सुख हेतु-मूला ।
स्वदेश-बोधे च वचांसि यस्य,
लाज: स लाज: खलु लाज-राय:

वीरः

तमी तु तिमिरा क्रान्ता,
मेघमाला विडम्बना ।
चपलायाश्चमत्कारः,
कर्का-गर्जन-तर्जनाः ।।

शाखा-पातो नदी-मार्गाः,
हिंस्रा वन्या पदे पदे ।
वाह-पातः स्वयं चाधः,
धृति-लेपो न राघवे ।।

सहसोत्थाय सूत्कृत्य,
प्रतस्थे हयमाश्रितः ।
धन्यो वीरो महाधीरः,
शिवराजस्य सेवकः ।।

अर्थसिध्यै पुरा लंकाम्,
प्रतस्थे हनुमान् यथा ।
वीरा विघ्नै र्न हन्यन्ते,
विघ्नघ्ना वीर जातयः ।।

वरं प्राण-परित्यागः,
शिरसो वापि छेदनम् ।
न तु स्वामि-हिते हानिः,
जातुचिदपि जायताम् ।।

इति मनसि निर्धार्य,
राष्ट्र भक्तः सुसाहसी ।
स्वामिनः पत्रमादाय,
सिंहा-त्तोरण मेति सः ।।

दूयन्ते

धन-बल-साधन-रिक्ता:,
बलवता च रिपुणाभि-भूता: ।
ताप-त्रयाभि भूता:
जागर दु:खेन दूयन्ते ॥

गुरु- जन - वाणी - रिक्ता:,
कामी चौरश्च हृत - वित्ता: ।
धातु-त्रयाभि भूता:,
जागर-दु:खेन दूयन्ते ॥

न दूयन्ते

सु सिद्धादेशा देश-हिता:,
तन्त्रे च योग्या मन्त्रि-वरा:।
कवि-मुनि-जपिनो बुध-प्रवरा:,
जागर-दु:खे न दूयन्ते ।।

राष्ट्रिय-सेवा-शीला:,
देश-हित-कृत-बहुविध-लीला:।
रिपु-हित-मानस-कीला:,
जागर-दु:खे न दूयन्ते ।।

भगीरथा: प्रण-पूर्तौ,
परशुरामास्तपसां च निधाना:।
योगेश्वराश्च कृष्णा:,
जागर-दु:खे न दूयन्ते ।।

विज्ञोऽपि शिथिलायते

मन्द-मानव-बोधे च
कलत्राभरणे तथा ।
दु:खानां च सदा योगे,
विज्ञोऽपि शिथिलायते ॥

खलानां चेष्टितं ज्ञातुम्,
स्त्रीणां वेत्तुं च मानसम् ।
जया-जयौ रणे बोध्दुम्,
विज्ञोऽपि शिथिलायते ॥

शीले च स्थिरता नास्ति,
वाचि सत्यं न तिष्ठति ।
षण्डमित्रं नरं बोध्दुम्,
विज्ञोऽपि शिथिलायते ॥

हठिनं मानिनं धर्मे,
कट्टर - वादिनं तथा ।
कूटं, बुद्धिपथे नेतुम्,
विज्ञोऽपि शिथिलायते ॥

अर्थ कामः श्रमं चरेत्

प्रज्ञा कामो वचां धीरः,
शक्ति कामः पयोऽमृतम् ।
ज्ञानकामो भजेदीशम्,
जींव कामो दिनेश्वरम् ॥

कुबेरं धन - कामश्च,
पयस्कामः पयस्विनीम् ॥

पुत्रकामो गणेशं च,
पति-कामा च पार्वतीम् ॥
यशस्कामो यजेद् देवीम्,
मुक्ति कामो महेश्वरीम् ।

वर्षा कामो यजेदिन्द्रम्,
लेखा कामः सुलेखिनीम् ॥

विद्या कामस्त्यजेत्सौख्यम्,
आयुष्कामो धृतं पिबेत् ।
शान्ति कामो भजेद् मौनम्,
अर्थ कामः श्रमं चरेत् ॥

केशा: श्वेता न चातपै:

कङ्कणं हस्त-शोभा न,
तनो: शुद्धि र्न चान्दनै: ।
भुक्तिश्च तृप्ति हेतु र्न,
मुक्ते र्मूलं न मण्डनम् ॥

पाषाणे गन्धलेपो न,
आत्मरूपं न वारिणि ।
केतक्या शिव पूजा न,
दुर्गा पूजा न दूर्वया ॥

कामैश्च काम - शान्ति र्न,
चिन्ता शान्ति र्न चिन्तया ।
धनेन लोभ शान्ति र्न,
न शान्ति र्बर्हिषां घृतै: ॥

नारीभिर्मोह-भङ्गो न,
सती भङ्गो न चारिभि: ।
फूत्कारै र्गिरि - पातो न,
केशा: श्वेता न चातपै: ॥

शोभते

दानेन शोभते पाणि:,
स्नानेन शोभते तनु: ।
मानेन शोभते प्राणी,
मुनिर्ज्ञानेन शोभते ॥

मदेन शोभते नाग:,
धनेन शोभते धनी ।
शीलेन शोभते नारी,
पत्नी पुत्रेण शोभते ॥

रूपेण शोभते रामा,
शशिना शोभते निशा ।
वरेण शोभते कन्या,
शचीचेन्द्रेण शोभते ॥

गुरुणा शोभते छात्र:,
फलेन शोभते तरु: ।
दुग्धेन शोभते धेनु:,
यतिर्धर्मेण शोभते ॥

पयसा शोभते पद्मम्,
निशया शोभते शशी ।
ओजसा शोभते वीर:,
कवि: काव्येन शोभते ॥

मूलम्

लोको वृक्षस्तस्य मूलं च राष्ट्रम्,
प्रान्ता: शाखा योजनाश्चाथ पत्रम्।
ताता: ! मूलं यत्नतो रक्षणीयम्,
छिन्ने मूले नैव शाखा न पत्रम् ।।

वंशो वृक्षस्तस्य मूलं च जाया,
पुत्रा: शाखा बान्धवाश्चाथ पत्रम्।
मान्या: ! मूलं सर्वत: पालनीयम्,
छिन्ने मूले नैव शाखा न पत्रम् ।।

विश्वं वृक्षस्तस्य मूलं च भ्रान्ति:,
तृष्णा: शाखा योजनास्तत्र पत्रम् ।
जाता: ! भ्रान्तिर्ज्ञान-शस्त्रेण छेद्या,
छिन्ने मूले नैव शाखा न पत्रम् ।।

सहायक:

राजद्वारि रुजायां वा,
अकाले वैरि-मर्दने ।
प्रेत-भूमौ विपत्काले;
यः सहायः सहायकः ॥

स्वाध्याये च परीक्षायाम्,
उत्पाते राष्ट्र-संकटे ।
ग्रहेषु प्रतिकूलेषु,
यः सहायः सहायकः ॥

हरेर्नाम विवेके च,
सत्सङ्गे तीर्थ-सेवने ।
शास्त्र-काव्यादि गोष्ठीषु,
यः सहायः सहायकः ॥

गुरु द्वारे विहारे च,
मन्दिरे मज्जिते तथा ।
मठे चर्चे समाजे च,
यः सहायः सहायकः ॥

गुरु-वाणी प्रबोधार्थे,
गीता पादार्थ-बोधने ।
कूट-पदार्थ-विज्ञाने,
यः सहायः सहायकः ॥

राष्ट्रान्दोलन-कारासु,
नवोद्योग-प्रबन्धने ।
बलीयसा च संघर्षे,
यः सहायः सहायकः ॥

परीक्ष्यन्ते

प्रषणे व्यसने चैव;
आपत्काले टकाक्षये ।
प्रष्य-बन्धु-सखी-दारा:,
परीक्ष्यन्ते यथार्थत: ॥

काव्य-साहित्य वेलायाम्,
सन्निपाते रणोत्सवे ।
कवयो भिषजो वीरा:,
परीक्ष्यन्ते यथार्थत: ॥

घर्षणच्छेदन ताप—
ताडनाश्च सुवर्ण-गुण-वृद्धिकरा: ।
श्रुत-शील-गुणायामा:,
वाणी पुरुषे परीक्ष्यन्ते ॥

स्वर्णायते युग:

रमया सहिता रामा,
रमणेन हितात्मज: ।
धेनोश्च जायते वत्स:,
नूनं स्वर्णायते युग: ॥

सुभगो दयितो दक्ष:,
प्रोच्चं च पदमाश्रित: ।
तनये तनयोत्पत्ति:,
नूनं स्वर्णायते युग: ॥

शस्याढ्या च कृषि: क्षेत्रे,
गृहे सन्त समागमा: ।
गोविन्दे परमा-प्रीति:,
नूनं स्वर्णायते युग: ॥

तीर्थे स्नानं गृहे होम:,
दान-पूजा - रतिर्मति: ।
वटव: पटवो मोदन्ते,
नूनं स्वर्णायते युग: ॥

मशक-पाद-विपादिकायाम्

मूर्खो विलासि-कुजनः कुरुते दिवा किम् ?
मुक्ता दधाति विमला वद को नु शीर्षे ?

भूतं न दृष्ट मथवा नहि जातु किं तत् ?
शेते करी मशक पाद विपादिकायाम् ? ॥

सन्धिच्छलेन हतको नवरङ्गजीवः,
आहूय सिंह - पुरुषं शिवराज वीरम् ।

कारां निनाय सहसा विबुधास्तदाहुः,
शेते करी मशक - पाद- विपादिकायाम् ॥

सर्वत्र सर्वे गुणाः

जातेयं धन-मेधिनां च सदने गीता-कला-कोकिला,
बाला शिल्प-कलासु सा सुविदिता, रत्या भ्रमो जायते।

लावण्ये परमा श्रियो मदरणा नैदृग् वधूर्लभ्यते,
सेयं दीर्घ-मुखी सखे! क्व नु पुनः सर्वत्र सर्वे गुणाः॥

उत्पत्तिर्धनिनां कुले सुमहतां तातः पदे प्रोन्नते,
भ्राता मन्त्रिपदेच्छुकश्च, दशमो, माता च तूती गुणाः।

तारुण्यं तरुण प्रमादि विशिखा कामस्य चेष्टा वधूः,
वामा वामक लोचना, क्व नु पुनः सर्वत्र सर्वे गुणाः॥

आस्यं सोम समं स्तनौ कलसीभौ बाहू प्रकामं नतौ,
मध्यं क्षाममहो गति गंजपतेर्जङ्घे रथाभे चले।

कान्ति यौवन सर्गजा तव कृते नैदृग्वधूर्लभ्यते,
कोपा कम्पित-भाषिणी क्व नु पुनः सर्वत्र सर्वे गुणाः॥

सत्त्वे वसति

विजेतव्यः पाको हरि - विषय - कूटास्त्र - वलितः,
निजीया सज्जा नो शिविर-पिटरा लोक-विदिताः ।

नवो नेता शास्त्री रिपु शलभ - दाहेऽनिल - निभः,
क्रिया - सिद्धिः सत्त्वे वसति महतां नोपकरणे ॥

पिताऽऽसीन्नो, माता विकल - विधुरा सद्म - रहिता,
पणाभावो नैवं निज सुकरणे येन गणितः ।

पदं प्रोच्चं प्राप्तं नरवर ! नमः कोटिशतशः,
क्रिया - सिद्धिः सत्त्वे वसति महतां नोपकरणे ॥

न च सुवंशश्चन्दनं भवति

अन्तः सार-विहीनाः
जना हित-वचनं न जातु गृह्णन्ति ।
मलयानिल-संसृष्टः,
न च सुवंशश्चन्दनं भवति ॥

गीता-जपुजी-पदानि,
शीलितानि मूर्ख-हृदयं न विशन्ति ।
मलय गिरेः सम्पर्के,
न च सुवंशश्चन्दनं भवति ॥

न नानक-कृष्ण-वचांसि,
श्रावितानि जड-मानस माहरन्ति ।
मलयानिलेन पृक्तः,
न च सुवंशश्चन्दनं भवति ॥

वेद-पुराण-सरांसि न,
जडे सेवितानि बहुशः प्रभवन्ति ।
मलयानिल-संपृक्तः,
न सुवंशश्चन्दनं भवन्ति ॥

सर्वारम्भाः

जाया रण्डा, कामुकी चापि काणी,
माता भण्डा लुण्ठकी चाथ गुण्डी ।
सर्वे दोषा निर्धनानां, गुणा नो,
सर्वारम्भा स्तण्डुल - प्रस्थ - मूलाः ॥

स्तेनो मूर्खः कोपनः साहसी वा,
दम्भी मायी लोलुप स्तामसो वा ।
भीरुर्भण्डू निर्धनो लोक - दृष्टौ,
सर्वारम्भा स्तण्डुल प्रस्थ - मूलाः ॥

काणोराजा कामुकः कामराजः,
अन्धो विज्ञः सोमदृक् साम्यदर्शी ।
अर्थाभावे चार्थभावे नराणाम्,
सर्वारम्भा स्तण्डुल प्रस्थ - मूलाः ॥

बालालापाश्चारुहासै विचित्राः,
भव्या वेषाश्चान्दनाश्चाथ लेपाः,
रम्या रागा क्लेशदा निर्धनानाम्,
सर्वारम्भा स्तण्डुल प्रस्थ - मूलाः ॥

श्यामा छाया कोकिला गीति वाणी,
भासो हासा: कामिनीनां विलासा: ।
रम्या रात्री रोचते निर्धनानाम्,
सर्वारम्भा स्तण्डुल - प्रस्थ - मूला: ॥

नव्यैर्भव्यैश्चारु भावै रुपेता,
वीणा - वाणी - वाण - वन्या पदाली ।
चारु: स्यात्किं क्षुत्पिपासाऽऽतुराणाम्,
सर्वारम्भा स्तण्डुल - प्रस्थ-मूला: ॥

शास्त्रे चर्चाऽऽन्दोलने योग - दानम्,
कण्ठे गीतिर्मण्डने चाथ प्रीति: ।
खण्डे सर्पि दृश्यते नोऽधनानाम्,
सर्वारम्भा स्तण्डुल - प्रस्थ - मूला: ॥

नौका - यात्रा तीर्थ - राजे विहार:,
दुर्गा - चण्डी - पूजने वा विचार: ।
कण्ठे जातो लीयते हाऽधनानाम्,
सर्वारम्भा स्तण्डुल - प्रस्थ - मूला: ॥

न जीर्यते

यत्र श्री नानको देवः,
गुरुस्तेग बहादुरः।
गुरु गोविन्द सिंहश्च,
ईदृग् राष्ट्रं न जीर्यते॥

परशुरामश्च रामश्च,
कृष्णो बुद्धो जिनेश्वरः।
रामदासो रविर्यत्र,
ईदृग् राष्ट्रं न जीर्यते॥

विहारी भूषणः सूदः,
तुलसी तुलसी - समाः।
निराला मैथिली वर्मा,
ईदृग् राष्ट्रं न जीर्यते॥

कबीरश्च रहीमश्च,
जायसी रसवित्तमाः।
रसखानो रसो जज्ञे,
ईदृग् राष्ट्रं न जीर्यते॥

भारवि र्भवभूतिश्च,
विशाखा - व्यास - दण्डिन: ।
यत्र बाणोऽश्वघोषश्च,
ईदृग् राष्ट्रं न जीर्यते ।।

तिलकश्च पटेलश्च,
जातो लाल बहादुर: ।
भक्तसिंहो गुरुदेव:,
ईदृग् राष्ट्रं न जीर्यते ।।

बालमीकि: कालिदासश्च,
भासो हर्षश्च शूद्रक: ।
मुरारि र्जय देवश्च,
ईदृग् राष्ट्रं न जीर्यते ।।

राधाकृष्णश्च राजेन्द्र:,
नेहरुरिन्दिरा तथा ।
श्यामा देशमुखो बोस:,
ईदृग् राष्ट्रं न जीर्यते ।।

भावेजयप्रकाशश्च,
देशायी मेननो रवि: ।
मालवीयश्च गोस्वामी,
ईदृग् राष्ट्रं न जीर्यते ।।

महाराणा प्रतापश्च,
शिवराजो नरोत्तम: ।
झांसी वाली तथा रानी
ईदृग् राष्ट्रं न जीर्यते ।।

मम्मटो विश्वनाथश्च,
जगन्नाथश्च पण्डित: ।
उदयनश्च नृसिंहश्च
ईदृग् राष्ट्रं न जीर्यते ।।

ध्रुवं मरणाय कल्पते

सखा शठोऽसती नारी,
नेति नीतिश्च सेवकः ।
अहि-वासे गृहे वासः,
ध्रुवं मरणाय कल्पते ॥

रोगैश्शोकैस्तथोत्पातैः,
सेतिभिश्च प्रदूषिते,
प्रेत ग्रस्ते गृहे वासः,
ध्रुवं मरणाय कल्पते ॥

मान हीना च या वृत्तिः,
प्रवृत्ति र्या च लुण्ठने ।
संवृत्तिद्यू्त पानादौ,
ध्रुवं मरणाय कल्पते ॥

लग्ने पापैः समाक्रान्ते,
पुण्य दृष्टि विवर्जिते ।
लग्नेशो द्वादशे भावे,
ध्रुवं मरणाय कल्पते ॥

कर्के लग्ने शशी क्षीणः,
क्रूरैः पापैश्च वेष्टितः ।
आयु र्भावं च सम्प्राप्तः,
ध्रुवं मरणाय कल्पते ॥

वृत्ति हीनः सुतो दस्युः,
वृत्त - हीनश्च जापकः ।
वर्धमानस्तथाऽतङ्कः,
ध्रुवं मरणाय कल्पते ॥

तद्राष्ट्रं सुख मेधते

मदाध्याय: प्रजा वर्गे,
स्वाध्यायो गुरु छात्रयो: ।
न्यायो न्यायाधिकारिषु,
तद् राष्ट्रं सुखमेधते ।

लोके शान्तिश्च नो भ्रान्ति:,
प्रजा वृद्धि र्नियन्त्रिता ।
वित्तागमा नवा यत्र,
तद्राष्ट्रं सुखमेधते ॥

शाणोल्लीढा:, विवादाश्च,
शस्योल्लीढाश्च भूमय: ।
शासकाश्च गणोल्लीढा:,
तद्राष्ट्रं सुखमेधते ॥

बिभेति कोऽपि कस्माच्चित्,
भीतिं कस्मै न यच्छति ।
तङ्कते शङ्कते नो ना,
तद्राष्ट्रं सुखमेधते ॥

पीनोधा: कपिला यत्र,
गोपा गो वंश-पालका:,
नवनीतं च तक्रं च,
तद्राष्ट्रं सुखमेधते ॥

श्रेष्ठिन: श्रोत्रिया विज्ञा:,
सरिता वैद्य - भूषणा: ।
मोदन्ते च विराजन्ते,
तद्राष्ट्रं सुख मेधते ॥

लोक-यात्रा च भी लंज्जा,
नैपुणी दान वीरता ।
इमा यत्र समेधन्ते,
तद्राष्ट्रं सुखमेधते ॥

यत्र पुत्र: पितुर्भक्त:,
पुत्राणां पाषक: पिता ।
भार्या-मित्रे च विश्वस्ते,
तद्राष्ट्रं सुखमेधते ॥

प्रषणे व्यसने चैव,
आपत्काले धन क्षये ।
सज्जन्ते सज्जना यत्र,
तद्राष्ट्रं सुखमेधते ॥

दिवं नयन्ति

परोपकारः शुचिरर्थ-सारः,
स्वार्थापहारः सुकृतः प्रकारः ।
धर्मे सुधारः कमलावतारः,
पीडापहारश्च दिवं नयन्ति ।।

रती रमेशे रमणे न वेषे,
कामः सुकाव्ये न कलत्र चित्ते ।
भक्तिः सुशक्तौ न कुचैक पत्ते,
सम्यग्विचारेण दिवं नयन्ति ।।

भार्यानुरक्तिः शिव-शक्ति-भक्तिः,
विद्यानुषक्तिः प्रमदा-विरक्तिः ।
साधु सुगीतिः सुकृते सुरीतिः,
गो-देश-भक्तिश्च दिवं नयन्ति ।।

न दिवं नयन्ति

विरोध वृत्ति विषयेष्व तृप्तिः,
पैशुन्य वृत्तिश्चपला प्रवृत्तिः ।
प्रीतिः खलानां प्रमदा प्रतीतिः,
सुरा प्रपीति नं दिवं नयन्ति ॥

भ्रातुर्वधूर्वा भगिनी निजा वा,
तनूज-जाया शरणा गता वा ।
पादानता वा सदनागता वा,
दृष्टाः कुदृष्ट्या न दिवं नयन्ति ॥

पुण्याद् विरामः पर-दार-कामः,
अर्थेन साध्यः कुलटा-विलासः ।
धर्मे च दम्भः पर-धर्म-क्षेपः,
तीर्थे विलासो न दिवं नयन्ति ॥

स सुखेन शेते

प्रिय: शाखा दास जनोऽनुकूल:,
स्वामी सुधीस्तनू रोग-हीना ।
कुले न कन्या न च राज-शङ्का,
प्रसार्य पादौ स सुखेन शेते ।।

यस्यास्ति धीर: सरल: सहाय:,
नैजो विवेक: प्रमदा सुशीला ।
मुखे पवित्रा सरला च वाणी,
प्रसार्य पादौ स सुखेन शेते ।।

क्षीरा सुवत्सा कपिला वरिष्ठा,
मोदै: समोदा: शिशव: समस्ता: ।
ऋणं न धार्यं सदनं स्वकीयम्,
प्रसार्य पादौ स सुखेन शेते ।।

यस्यास्ति कोशो मणि-रत्न-पूर्ण:,
सन्त: सहायास्तुरगी तुरङ्गा ।
मतिर्विचित्रा गति: काव्य-बन्धे,
प्रसार्य पादौ स सुखेन शेते ।।

यस्यास्ति धान्यं सदने विशालम्,
हैयङ्गवीनं महिषी पयश्च ।
राज्याश्रयो भोग करो महोच्च:
प्रसार्य पादौ स सुखेन शेते ।।

स सुखं न शेते

प्रभुर्न विज्ञो रमणी न रामा,
पुत्रः प्रमादी तनया च वामा।
स्थिरो न चायश्चपलाः सखायः,
प्रसार्य पादौ स सुखं न शेते ॥

मन्त्री कुमन्त्रो न च साध्य-तीरे,
गेहे तथाहि: पिशुनोऽविदूरे।
रोगा नवीना विविधाः शरीरे,
प्रसार्य पादौ स सुखं न शेते ॥

नैशाः सहायाः पर-वित्त-चित्ताः,
राज्ञः कुनीतौ रिपु नाम वत्ता।
सतां न सङ्गश्च दिशाङ्कवत्ता,
प्रसार्य पादौ स सुखं न शेते ॥

ये - ते

भेके सुजिह्वां श्रवणे द्विजिह्वे,
वन्ध्या-तनूजं कमठी स्तनौ वा ।
खे चापि पुष्पं पवने च रूपम्,
वाच्छन्ति ये नून मपण्डितास्ते ।।

भार्यां कुचारां भगिनीमघोनाम्
सुतामवासे तनुजं प्रवासे ।
प्रेतस्थ-भूमौ जनकौ च वृद्धौ,
कांक्षन्ति ये नूनमपण्डितास्ते ।।

कामोप भोगै विषयेषु तृप्तिम्,
घृत-प्रदानैरनलोपशान्तिम् ।
कुवाच्य-जातै र्मनसश्च तुष्टिम्,
इच्छन्ति ये नूनमपण्डितास्ते ।।

बाल्ये विवाहं कृपणे च दानम्,
कामोपशान्तिं तरुणी-जनेषु ।
मूर्खे विचारं पिशुने सुधारम्,
वाञ्छन्ति ये व्यक्तमपण्डितास्ते ।।

कोपेन मित्रं विनयेन शत्रुम्,
पापेन पुण्यं तमसा प्रकाशम् ।
जेतुं च लोके लगुडेन जायाम्,
इच्छन्ति ये नूनमपण्डितास्ते ।।
देशे कुराज्यं सदने विवादम्,
वाण्यां कुवाक्यं भजने विरक्तिम् ।
निन्दानुषक्तिं कृपणानुरक्तिम्,
कांक्षन्ति ये नूनमिहासुरास्ते ।।

कमलं—कठिनम्

मुखं रम्यं यस्याः सरल-सरसा लाघव-गिरः,
पयोदौ गङ्गाभौ विनय-सुनता यौवन-लता ।
पराधीनः कायो मदयति जडो यौवन मदः,
उरः प्रत्यासङ्गे कमलमपि ते चण्डि ! कठिनम् ।।

पयोदः शीर्षस्थः परमरमणीयं वनमिदम्,
रहो रम्यो रागो विषम-शर-बाणास्तव तनुः ।
मुधा यत्नः कोपे चरण-पतितः सेवक-जनः,
उरः प्रत्यासङ्गे कमलमपि ते चण्डि ! कठिनम् ।।

समीरोऽयं शीतः शिशिर-समयो यौवनमिदम्,
रहो रात्री रम्या नव जलदघोषश्चपलितः ।
रुषां चर्चा चेयं चरण-पतितो वल्लभ-जनः,
उरः प्रत्यासङ्गे कमलमपि ते चण्डि ! कठिनम् ।।

अयं गुप्तः कुञ्जो विषम-शर सेवा-समुचितः,
अयं वायु र्दिव्यो दरविददेला परिचितः ।
इयं बर्षा धन्या नव जलद-विन्यास-कुशला,
उरः प्रत्याङ्गे कमलमपि ते चण्डि ! कठिनम् ।।

सुधां पीत्वा यस्याः परम-पुरुषा योग्य महिलाः,
जना जाता लोके रिपु-दल-विपाटेऽनल-निभाः,
वृथा प्राहुस्तां ते तनुज-भगिनी-तात-विकलाः,
उरः प्रत्यासङ्गे कमलमपि ते चण्डि ! कठिनम् ।।

सा धरा

पितुरथोपनेतुश्च,
विद्या दातु र्नचादरः ।
अन्न दातु र्भयात्रातुः,
सा धरा चाधराऽधरा ॥

गुरवो मुनयो ग्रन्थाः,
वेद - शास्त्र - परम्पराः ।
धार्मिकाश्चावहेल्यन्ते,
साधरा चाधराऽधरा ॥

तृप्तेषु भोजनं दानम्,
केश शूलीषु चादरः ।
शिव-शूला द्विजा यत्र,
सा धरा चाधराऽधरा ॥

उपसर्गा महोत्पाताः,
प्रत्यया न यथायथम् ।
गुरुमुखा न सङ्ज्ञाश्च,
सा धरा चाधराऽधरा ॥

रोरुदा चाथ सर्वत्र,
लोलुठा च यथायथम् ।
वावदा, मोमुदा नास्ति,
सा धरा चाधराऽधरा ॥

पत्नी मातुः स्वमातुश्च,
मित्र मातु र्न चादरः ।
राज - मातु र्गुरोर्मातुः,
सा धरा चाधराऽधरा ॥

रज्यते कर्मचारी नो,
कुल-नारी न लज्जते ।
पक्षायते धरा पालः,
सा धरा चाधराऽधरा ॥

भाण्डा यत्र न धान्यानाम्,
मन्त्री न मन्त्र-मार्मिकः ।
यज्ञश्च दक्षिणा हीनः,
सा धरा चाधराऽधरा ॥

उच्चास्ताल द्रुमा एव,
धावका एव दानिनः ।
वित्त - दार - हरा भूपाः,
सा धरा चाधराऽधरा ॥

विप्रादरो न यत्रास्ते,
वेद - शास्त्रे न गर्जतः ।
स्वाहा - स्वधाध्वनिर्नैव,
सा धरा चाधराऽधरा ॥

परम्

सज्जते कर्म चारी च,
कुल - नारी च लज्जते ।
पक्षायते न भूपाल:,
सा धरा मोदते सदा ।।

भण्डारा यत्र चान्नानाम्,
मन्त्रिणो मन्त्र वित्तमा: ।
दातारो यजमानाश्च,
सा धरा विश्व - गौरवम् ।।

वेताला एव शास्यन्ते,
उन्मुखा दण्ड - भागिन: ।
भ्रातृ - भाव: प्रजावर्गे,
सा धरा मोदते सदा ।।

वाहि गुरु: खुदा राम:,
एकोंकार: स ईश्वर: ।
वयमेक: परिवार:
सा धरा विश्व-गौरवम् ।।

रसानां यत्र भण्डारा:,
सरसा धेनु - मण्डली ।
कदली सुरसा द्राक्षा:,
सा धरा मे धराधरा ।।

सत्य-प्राणा: प्रजा-पाला:
पण्डिता: पार दर्शिन: ।
दया शान्ति क्षमा शीला:,
सा धरा विश्व - गौरवम् ।।

वृत्ति र्भीतिस्तथा लज्जा,
दक्षता दान वीरता।
बन्धुता मानवीया वा,
सा धरा जीयतां सदा ॥

कर्म - योगे च विश्वस्ता:,
योग - क्षेमे च तत्परा: ।
नक्षत्रे पूर्ण - विश्वासा:,
सा धरा जीयतां सदा ॥

भ्रातृ भावे च रामाद्या:,
कर्म - भावे च पाण्डवा: ।
यादवा एकता भावे,
सा धरा मे हिता प्रिया ॥

यदा - तदा

स्वलीलया जगत्रातुं,
आविर्भूतमजं हरिम् ।
कल्याण - नन्दनं वन्दे,
तृप्ता - लोचन - तारकम् ॥

यदा समन्तात्प्रससार हिंसा,
चासीदनर्थो गहनान्धकारः ।
बालेषु गोषु महिलासु हेला,
तदा स जातो महसां महेन्द्रः ॥

यदा म्लेच्छैर्बहुशो जगत्याम्,
निरीक्षिताश्शिष्ट जनाश्च घोरम् ।
गतश्च भानोर्भुवि सज्जनानाम्,
प्रापि प्रतापः परमेश्वराणाम् ॥

यदा च काकैर्बहुधा धरण्याम्,
निपीडिता स्तीर्थ जनाश्च तीव्रम् ।
यातं च तेजो विलयं जनानाम्,
जातस्तदानीं पुरुषोत्तमोऽसौ ॥

मतैरनेकै र्जटिलैर्घनैश्च,
यदाऽस्तमेतः किल वेदभानुः ।
स्वार्थेरिता धूर्त जनाश्च लोके,
तदा स जातो महसां महेन्द्रः ॥

सर्वेऽपि वर्गा विकला कुमारी,
हाहेतिकारं रुरुदुः समन्तात् ।
अस्तोन्मुखा भारत संस्कृतिश्च,
तदा स जातो महसां महेन्द्रः ॥

धर्मस्य तत्त्वं न विवेद कोऽपि,
आडम्बरासक्तमनाश्च लोकः ।
वेदेषु शास्त्रेषु भृशं प्रहारः,
तदा स जातो महसां महेन्द्रः ।।

मनीषिणश्चाथ महाजनाश्च,
प्रमादिनः स्वार्थ - सुरां निपीय ।
म्लानाश्च खिन्नाः सुजना विषण्णाः,
तदा स जातो महसां महेन्द्रः ।।

वैदेशिकै र्भारत - भूः पवित्रा,
रत्नै र्विहीना विहिता वराकी ।
क्षमाऽक्षमा सन्तति - पालनेऽपि,
तदा स जातो महसां महेन्द्रः ।।

महत्तमो गुरु देवो,
नानकः सद् गुणार्णवः ।
रक्षिता मे कला येन,
शिवायास्तु सदाशिवः ।।

डॉ॰ रवीन्द्र कौर:
संस्कृत विभागाध्यक्ष:
पंजाबी विश्वविद्यालय:, पटियाला

'श्री शुकदेव मुनिरिति' सुगृहीतनाम्ना महाभागेन विरचितस्य 'मङ्गलानक्षत्रम्' इति नाम्न: कवितासंग्रहस्याद्योपान्तं पठनानन्तरं यत्र कवे: भाषायां नवीनता, सरलता, सहजबोधगम्यतादय: गुणा: दरीदृश्यन्ते तत्र पदाना-मनुल्बणत्वं, भावानां गाम्भीर्यं सम्प्रेषणीयत्वञ्चा-भिव्यज्यन्ते प्राचुर्येण। शीर्षकवैविध्ये विभक्तेषु, परिस्फुटाक्षरै: संयुतेषु, संस्कारवत्या च गिरा प्रकटितेषु कवे: भावेषु भक्तिभावनाया:, राष्ट्रीयैकताया:, राष्ट्ररक्षणस्य, जनजागरणस्य चोद्घोष एव दृश्यते अनेकत्र। 'दिल्ली' इति शीर्षकेणालंकृतायां कवितायां राष्ट्रीयताया एकताया: अमूल्य: संदेश: इत्थं संस्थापित: :-

'धर्मा भिन्ना देशस्त्वेक:, प्रान्ता भिन्ना देशस्त्वेक:।
भाषा भिन्ना देशस्त्वेक:, देशस्त्वेक:, देशस्त्वेक:॥'

'शाखा भिन्ना वृक्षस्त्वेक:, हस्तो भिन्नो मुष्टिस्त्वेका।
धारा भिन्ना: सलिलं त्वेकम्, कुम्भा भिन्ना गगनं त्वेकम्।
देहा भिन्ना आत्मा त्वेक:, मार्गा भिन्ना दिल्ली त्वेका।'

'देशं जाने नान्यं जाने॥'

भक्ते: शक्तेश्च समन्वयेनैव कवि: निजकवितामार्गे अग्रसरो दृश्यते। 'हिता', मात: प्रपन्नार्ति-हरे प्रसीद, 'पाहि विश्वम्' इत्यादिषु नैकासु यत्र निजेष्टदेवान् प्रति भक्तिभावना प्रदर्शिता तत्र तेभ्य: राष्ट्र-हितस्य याचनाऽपि कृता। इत्थं राष्ट्रभावनया प्रेरिताया: भक्तिभावनाया: प्रतिपादनेन राष्ट्रकल्याणस्य अरिसंहरणस्य च प्रबलेच्छामभिव्यजमान: कवि: महतीं सफलतामधिगत: इति मे निरस्तसंशीति विश्वास:। निजानु-पमप्रतिभासमन्वितया काव्य-धारया कवि: संस्कृतसाहित्यस्य सेवायां नैरन्तर्येण निरतो भवेदित्यहं प्रार्थये।

प्रो० देवदत्त भट्टि:

भारत-राष्ट्रपतिना सम्मानित:
साहित्य-शिरोमणि-पुरस्कार-प्राप्ता

पञ्चाम्बु-पञ्चानना:, पण्डित-प्रवरा, अधीतिनश्चतुर्ष्वाम्नायेषु, श्रीजुष आचार्य शुकदेव शास्त्रिणो, मूर्धन्य-विद्वांसो वरिष्ठाश्च कवय: सन्ति पंजाब प्रदेशस्य। यथा ते वैदुष्य-पूर-पूरितास्तथा प्रतिरोम-स्नेह-रस-सिक्ता राजन्ते विद्वत्सु नातिशयोक्तिरियम्। "विनयदघ्नं तेषां वैदुष्य, वैदुष्य-दघ्नश्च तेषां विनय:" इति जानन्त्येव समे, ये तेषां दृक्पथमायान्ति। असामान्योऽयं क्रमो धरित्र्याम्। वैदुष्य-भाजो हि न भवन्ति भाजनानि प्रायो विनयानाम्।

सुरभि-स्वर्णमिति वक्तुं शक्यते तेषां व्यक्तित्व विषये। पाण्डित्य-प्रसार-पूतमपि रस दिग्धमस्ति तेषां कवित्वम्। एवं प्राय: परस्पर सह-भावभाग्गुण - गणमाकलयन्त: कवि शिरोमणय: आचार्य चरणा: शुकदेव शर्माण: सर्वत्र समादरं भजन्ते। तेषां कवि प्रतिभा विद्वत्प्रतिभा चेतरान् सुदूरंअतिशयाते।

अभिनवोऽयं प्रयास: संस्कृत काव्य क्षेत्रे। परम्परागतभङ्गिमान माश्रयद्भिरपि विद्वत् कविभि: किमप्यपारम्परिकं कथ्यं चिन्वद्भि: सत्यमेव काव्स्य नवं रूपं प्रस्तुतमत्र तैं एतच्चमत्कृतये नूनं वर्धन्ते ते।

संस्कृत काव्यं प्राचीनतमं सदपि नैक नवानि रूपाण्या-विष्करोति, संस्कृतं च जगत्स्व-रस-मधुरिम्नाऽऽप्याययति सततम्।

परमोऽयं हर्ष विषयो यत्तेषां लेखनो प्रतिवर्ष किञ्चिद् ग्रन्थ-रत्नं सृजति संवर्धयतितमां च सुतरां प्रथममेवातितरां वर्धमानां तेषां कीर्ति-लताम्।

काव्यमेतत्समेषामेव विदुषामधीतिनां च कृतेऽवश्यमेवोपयोगि सेत्स्यतीति मे मति:।

न प्रापि क्वचिदुत्काव्यम्, नोत्सूत्रं च कदाचन।
सकलं राजते काव्यं, रसवच्चारु मोहनम्॥

कामोऽयं मे यदिदं काव्यरत्नं शास्त्र्यादि परीक्षाणां पाठ्य क्रमेषु नियतं स्यादधिकृतैरितिवाच्यं स्वमुपसंहरे।

डॉ० राम प्रतापो वेदालंकार:,
जम्मू विश्व विद्यालये संस्कृत विभागे वरिष्ठाचार्य:

श्री शुकदेव शर्म मुनि-विरचितो मङ्गला नक्षत्र नामक: कविता-संग्रहो मयाऽवलोकित: । अत्र विषय वैविध्यं, रस-भाव प्रवणत्व-मर्थगाम्भीर्यं, कल्पना चातुर्यं, काव्य-सौन्दर्यं, भाषा-सौष्ठवं, पद-लालित्यादिकं च बहुश: समुपलभ्यते ।

अन्यच्च, इमा: कविता: सहृदय-हृदयान्यावर्ज्य कान्ता सम्मित तया-उपदिशन्ति । एवमेता अध्येतृणां मनांस्यपि परिष्कुर्वन्ति ।

एतादृशोभि: कृतिभि: गीर्वाण-वाण्या: सरस्वती-देव्या: कोषे सामयिकी वृद्धि र्जायते । महत्त्व पूर्णा चेयं वृद्धि: । एतया अयं महतीं कीर्त्ति लभतां कविपुङ्गव: ॥

डॉ० शुकदेवः
अमृतसरे गुरु-नानक-विश्व-विद्यालये,
संस्कृत-पाली-प्राकृत-विभागे, वरिष्ठाचार्यः

"नाभा" संस्कृत-संस्थायाः,
प्राचार्येण सुमेधसा ।

रचिताः कविता रम्याः,
बहु - भाव - समन्विताः ॥

शुकेन गुम्फिता माला,
"मङ्गलानक्षत्र" नामका ।

विद्वत्सु लभतां मानम्,
पुण्य - कीर्त्ति - यशःप्रदा ॥

●

डॉ० अभिमन्यु:
पंजाबी-विश्व-विद्यालये,
संस्कृत-विभागस्य वरिष्ठाचार्य:

आचार्य-वर्यै: श्री शुकदेव महाभागै विरचिता: काव्य-कणिका: पायं पायं मोमुदीति मे मानसम्। श्रीमता मुनिना विरचितमिदं काव्यमनुप्रासयुतं, माधुर्य-धुर्य-गुण-ग्राम-विराजितं, नाना-रस-भ्राजितं जिताखिल-लोक-मानसं च चमत्कार-ततिं तन्वत् कं सचेतसं नानन्दयिष्यतीति-उत्प्रेक्षे।

अस्य काव्यस्य निर्मितिमादधाना: श्री शुकदेव महोदया: सुतरां साधुवाद भाज: समुल्लसन्तीति।

पं० विश्व नाथ शास्त्री
संस्कृत-समाचार-विभाग:
आकाश-वाणी, नई दिल्ली ।

सख्या प्राचार्य वर्णेन,
शुकदेवेन कल्पित: ।
मङ्गलानां च नक्षत्रं,
कविता-संग्रहो नव: ।।

संस्कृतस्य प्रचाराय,
प्रसाराय च भारते: ।
श्लाघ्य: प्रशंसनीयश्च,
राजतां राजतां सदा ।।

पुराणश्च नवीनश्च,
प्राच्य-प्रतीच्य-सङ्गम: ।
विद्वत्सु-लप्स्यते मानम्,
सुदृढ: प्रत्ययो मम ।।

डॉ० ओम् प्रकाश: "सुबन्धु:"
भू. पू. प्रधानाचार्य:
नाभायां सर्वंकार-संस्कृत-महाविद्यालयस्य

संस्कृत वाङ्मयस्य कविता सरिता सततं प्रवहमाना आस्ते। आधुनिकैः विद्वद्भि: अस्यां सरितायां युगानुकूलं कूल दिशासु परिवर्तनं स्वीकृतं यत्र न समासानां जटिलता न च दुर्बोध पदानां प्रयोग:।

श्री मुनिना नवे अस्मिन् कविता-संग्रहे विषया: सरलेन संस्कृतेन अंकिता:। अत्र युगे सुर भारते: रक्षणाय, प्रचाराय प्रसाराय च येषां उपायानां आवश्यकता वर्तते तत्पूर्तये "मंगलानक्षत्रम्" अद्भुतं अद्वितीयं उदाहरणम्।

अत्र भाषा सरला, सुबोधा, प्रसाद-गुणा-गुम्फिता, नवा: भाव-बोधका: नवीना: च शब्दा: कविना आत्म-साद्, विहिता:। अर्वाचीना प्रचलिता च प्रणाली प्राचार्येण प्रेम्णा प्रांगणी कृता। प्राय: नूतनान् विषयान् समाश्रित्य एवात्र कविता: विहिता:। अत्रत्या: सर्वा अपि रचना. वज्ञानिकीं शैलीं समाधृता: सुबोधा: हृदयंगमा: च श्रीमुने: मनन-शीलतां व्यञ्जयन्ति।

श्रीशुक काव्यामृतं पायं पायं सहृदयानां विदुषां च मनांसि नूनं इयं आकर्षयिष्यति पठकेषु पाठकेषु च बहुमानं लप्स्यते, इति मम दृढा धारणा जाता इति।

लेखकस्य अन्य रचना:

● प्रतिज्ञा	रूपकम्
● परिचय	,,
● वेताल-पराजय	,,
● सप्तपदी	,,
● चक्रि-चक्र	,,
● जपुजी साहिब:	संस्कृत पद्यानुवाद:
● दशकुमार चरित (प्रथम निश्वास)	,,
● नानक सपाद शतकम्	
● समस्या पूर्ति-बाल गाथादि संग्रह:	